## शान्तिमन्त्राः

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः।

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः, स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु। ॐ शान्तिः शान्तिः शान्तिः।

ॐ यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय। ॐ शान्तिः शान्तिः शान्तिः।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते। ॐ शान्तिः शान्तिः शान्तिः।

## नारायणसूक्तम्

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्। विश्वं नारायणं देवमक्षरं परमं पदम्॥ विश्वतः परमान्नित्यं विश्वं नारायणग्ं हरिम्। विश्वमेवेदं पुरुष-स्तद्विश्व-मुपजीवति॥ पतिं विश्वस्या-त्मेश्वरग्ं शाश्वतग्ं शिवमच्युतम्। नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥ नारायणपरो ज्योतिरात्मा नारायणः परः। नारायणपरं ब्रह्म तत्त्वं नारायणः परः। नारायणपरो ध्याता ध्यानं नारायणः परः॥ यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥ अनन्तमव्ययं कविग्ं समुद्रेऽन्तं विश्वशम्भुवम्। पद्मकोश-प्रतीकाशग्ं हृदयं चाप्यधोमुखम्॥ अधो निष्ठ्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति। ज्वालामालाकुलं भाती विश्वस्यायतनं महत्॥ सन्ततग्ं शिलाभिस्तु लम्बत्याकोशसन्निभम्। तस्यान्ते सुषिरग्ं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥ तस्य मध्ये महानग्नि-र्विश्वार्चि-र्विश्वतोमुखः। सोऽग्रभुग्विभजन्तिष्ठ-न्नाहारमजरः कविः॥ तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता। सन्तापयति स्वं देहमापादतलमस्तकः। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः॥ नीलतो-यदमध्यस्था-द्विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा॥ तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्॥ ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥ ॐ नारायणायविद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥ ॐ शान्तिः शान्तिः शान्तिः ।।

## गोपिकागीतम्

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावकाः त्वयि धृतासवः त्वां विचिन्वते ॥ १॥
शरदुदाशये साधुजातसत् सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्क दासिकाः वरद निघ्नतो नेह किं वधः ॥ २॥
विषजलाप्ययात् व्यालराक्षसात् वर्षमारुतात् वैद्युतानलात् ।
वृषमयात्मजात् विश्वतो भयात् ऋषभ ते वयं रक्षिताः मुहुः ॥ ३॥
न खलु गोपिकानन्दनो भवान् अखिल देहिनाम् अन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ॥ ४॥
विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५॥
व्रजजनार्तिहम् वीर योषितां निजजनस्मय ध्वंसनस्मित ।
भज सखे भवत् किङ्करीः स्म नो जलरुहाननं चारु दर्शय ॥ ६॥
प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७॥
मधुरया गिरा वल्गु वाक्यया बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीर मुह्यती अरधरसीधुनाऽऽप्याययस्व नः ॥ ८॥
तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ ९॥
प्रहसितं प्रिय प्रेम वीक्षणं विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥ १०॥
चलसि यद्व्रजात् चारयन् पशून् नलिन सुन्दरं नाथ ते पदम् ।
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥ ११॥
दिनपरिक्षये नीलकुन्तलैः वनरुहाननं बिभ्रदावृतम् ।
घनरजस्वलं दर्शयन् मुहुः मनसि नः स्मरं वीर यच्छसि ॥ १२॥
प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३॥
सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४॥
अटति यत् भवान् अह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम् ॥ १५॥
पतिसुतान्वयभ्रातृबान्धवान् नतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६॥

रहसि संविदं हृच्छयोदयं प्रहसितान‌नं प्रेमवीक्षणम् ।

बृहदुरः श्रियो वीक्ष्य धाम तेमुहुरतिस्पृहा मुह्यते मनः ॥ १७॥

व्रजवनौकसां व्यक्तिरङ्ग ते वृजिनहन्त्र्यलं विश्वमङ्गलम् ।

त्यज मनाक् च नः त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८॥

****

**श्रीमदनमोहनाष्टकम्**

जय शंखगदाधर नीलकलेवर पीतपटाम्बर देहि पदम् ।

जय चन्दनचर्चित कुण्डलमण्डित कौस्तुभशोभित देहि पदम् ॥१॥

जय पङ्कजलोचन मारविमोहन पापविखण्डण देहि पदम्।

जय वेणुनिनादक रासविहारक बङ्किमसुन्दर देहि पदम्॥२॥

जय धीरधुरन्धर अद्भुतसुन्दर दैवतसेवित देहि पदम्।

जय विश्वविमोहन मानसमोहन संस्थितिकारण देहि पदम्॥३॥

जय भक्तजनाश्रय नित्यसुखालय अन्तिमबान्धव देहि पदम्।

जय दुर्जनशासन केलिपरायण कालियमर्दन देहि पदम् ॥४॥

जय नित्यनिरामय दीनदयामय चिन्मय माधव देहि पदम्।

जय पामरपावन धर्मपरायण दानवसूदन देहि पदम् ॥५॥

जय वेदविदांवर गोपवधूप्रिय वृन्दावनधन देहि पदम्।

जय सत्यसनातन दुर्गतिभञ्जन सज्जनरञ्जन देहि पदम्॥६॥

जय सेवकवत्सल करुणासागर वाञ्छितपूरक देहि पदम्।

जय पूतधरातल देवपरात्पर सत्त्वगुणाकर देहि पदम् ॥७॥

जय गोकुलभूषण कंसनिषूदन सात्वतजीवन देहि पदम्।

जय योगपरायण संसृतिवारण ब्रह्मनिरञ्जन देहि पदम् ॥८॥

********

**सुंदर लाला नंददुलाला**

सुंदर लाला नंददुलाला नाचत श्रीवृंदावन में ।

भाले चंदन तिलक मनोहर, अलका शोभे कपोलन में ।।

सिर पर चूडा, नयन विशाला, कुंदमाल हिय पर डोले ।

पाहिरन पीत पीताम्बर, बोले रुनुझुनु नूपुर चरनन में ।।

कोई गावत पंचम तान, बंसी पुकारे राधा नाम ।

मंगल ताल मृदंग रसाल बजावत कोई रंगन में ।।

राधा कृष्ण एकतनु होये, निधुवन में जो रंग मचाई ।

'विश्वरूप' जो भगवान सोई लीला करत वृंदावन में ।।

****

**केशव कुरु करुणा दीने**

**-महाकवि गिरिशचन्द्र घोष**

केशव कुरु करुणा दीने, कुञ्जकाननचारी

माधव मनोमोहन, मोहन मुरलीधारी।।

(हरिवोल हरिवोल हरिवोल मन आमार)

व्रजकिशोर, कालीयहर कातरभयभञ्जन

नयनवाँका,वाँका शिखिपाखा राधिका हृदिरञ्जन।

गोवर्धनधारण वनकुसुमभूषण दामोदर

कंसदर्पहारी श्यामरासरसविहारी।

(हरिवोल हरिवोल हरिवोल मन आमार)

****

**श्रीरामकृष्णस्तोत्रम्-१**

**-स्वामी विवेकानन्दः**

आचण्डालाप्रतिहतरयो यस्य प्रेमप्रवाहः

लोकातीतोऽप्यहह न जहौ लोककल्याणमार्गम्।

त्रैलोक्येऽप्यप्रतिममहिमा जानकीप्राणबन्धो

भक्त्या ज्ञानं वृतवरपुः सीतया यो हि रामः ।१।

स्तब्धीकृत्य प्रलयकलितं वाहवोत्थं महान्तं

हित्वा रात्रिं प्रकृतिसहजामन्धतामिश्रमिश्राम।

गीतं शान्तं मधुरमपि यः सिंहनादं जगर्ज

सोऽयं जातः प्रथितपुरुषो रामकृष्णस्त्विदानीम् ।२।

नरदेव देव जय जय नरदेव।

शक्तिसमुद्रसमुत्थतरङ्गं दर्शितप्रेमविजृम्भितरङ्गम्।

संशयराक्षसनाशमहास्त्रं यामि गुरुं शरणं भववैद्यम् ।३।

अद्वयतत्त्वसमाहितचित्तं प्रोज्ज्वलभक्तिपटावृतवृत्तम्।

कर्मकलेवरमद्भुतचेष्टं यामि गुरुं शरणं भववैद्यम् ।४।

नरदेव देव जय जय नरदेव ।।

**श्रीमद्भगवद्गीता**

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम्॥
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनी-
मम्ब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीम्॥
नमोस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र।
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः।
प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः।
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।
वसुदेवसुतं देवं कंसचाणूरमर्दनम्
देवकीपरमानन्दं कृष्णं वन्दे जगदगुरुम्॥
भीष्माद्रोणतटा जयद्रथजला गान्धारनीलोत्पला
शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला॥
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी
सोत्तीर्णा खलु पाण्डवै-रणनदी कैवर्तकः केशवः॥
पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटं
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा।
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे॥
मुकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्।
यत्कृपा तमहं वन्दे परमानन्दमाधवम्॥
यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदै-र्गायन्ति यं सामगाः॥
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः॥

****